# परिभाषेन्दुशेखरः - १

Program in which it is offered: [Integrated Masters – Vyākaraṇa]

**Course Category: [Core]**

**Schedule of offering: 6**

**Course Credit Structure: [5]**

- **Lecture: [5]**
- **Tutorial: [none]**
- **Practical: [none]**

**Contact Hours per week: [5]**

## 1. Introduction

पाणिनीयया प्रक्रियया साधुशब्दानां साधने विधिसूत्राणां प्रवृत्तिनियामिकाः परिभाषाः काश्चित् पाणिनिना पठिताः सन्ति । ततोऽतिरिक्ताः अपि परिभाषाः काश्चित् पूर्वाचार्यैः पठिताः, काश्चित् ज्ञापकसिद्धाः काश्चिच्च न्यायसिद्धाः अवश्यं शब्दसंस्कारकैराश्रयणीया भवन्ति याभिर्विना साधुशब्दनिष्पादनं न सम्भवति । तसामेतासां परिभाषाणां संग्रहः परिभाषापाठनाम्ना वैयाकरणनिकाये प्रसिद्धो वर्तते ।

एताः परिभाषाः नागेशभट्टेन परिभाषेन्दुशेखराख्ये स्वग्रन्थे विस्तरेण व्याख्याताः सन्ति । अत्र एकैकस्या अपि परिभाषायाः अवतरणिकां निरूप्य ग्रन्थकारः विस्तरेण अर्थं निरूपयति । तत्र तत्र ग्रन्थकारः सति मतभेदे कैयटादीनां मतमनूद्य निरस्य च स्वपक्षस्थापनम् उपपत्तिभिः करोति । भाष्यसिद्धान्तानुसारं परिभाषाणां व्याख्या अत्र वर्तत इति हेतोः अयं ग्रन्थः वैयाकरणसम्प्रदायेषु अत्यन्तमादृतो वर्तते ।

इहास्माभिः षष्ठात् सत्रादारभ्य अस्य ग्रन्थस्य अध्यापनं क्रियते । षष्ठे सत्रे तावत् आद्याः अष्टाविंशतिः परिभाषाः बाधबीजप्रकरणान्तर्गताः अध्याप्यन्ते ।

## 2. Course Objectives

अनेन क्रमेण अध्ययनस्य अन्ते छात्राः –

- परिभाषाणां निष्कृष्टम् अर्थं व्याप्तिं च साधु निर्णेतुं समर्था भवेयुः
- पूर्वाचार्याणां नागेशभट्टस्य च मते भेदान् सोपपत्तिकम् अवगन्तुं शक्नुयुः
- ग्रन्थगतान् विचारान् शास्त्रीयपद्धत्या निरूपयितुं समर्था भवेयुः

## 3. Pre-requisites

- शब्दसिद्धिप्रक्रियायाः दृढः परिचयः

## 4. Readings

- विश्वनाथ मिश्र, परिभाषेन्दुशेखरः, चौखम्बा सुरभारती प्रकाशन, वाराणसी

## 5. Module-wise topics

The suggested structure is as follows:

**Module 1 – आदितः अष्टौ परिभाषाः** **20 sessions**

**Objectives –**

- परिभाषाणां विषयस्य निष्कर्षः
- विविधपक्षविमर्शनपुरःसरं ग्रन्थकर्तुः सिद्धान्तपक्षस्य ज्ञानम्

**Topics –**

- कार्यकालपक्षः यथोद्देशपक्षः च
- एकान्ताः अनेकान्ताः वा अनुबन्धिः इत्यादयः

**Module 2 – उत्तराः अष्ट परिभाषाः** **20 sessions**

**Objectives –**

- परिभाषाणां विषयस्य निष्कर्षः
- विविधपक्षविमर्शनपुरःसरं ग्रन्थकर्तुः सिद्धान्तपक्षस्य ज्ञानम्

**Topics –**

- उभयगताः, यदागमपरिभाषा, स्थानिनिर्णयः इत्यादयः

**Module 3 – तत उत्तराः सप्त परिभाषाः** **20 sesssions**

**Objectives –**

- परिभाषाणां विषयस्य निष्कर्षः
- विविधपक्षविमर्शनपुरःसरं ग्रन्थकर्तुः सिद्धान्तपक्षस्य ज्ञानम्

**Topics –**

- अनुवृत्तिविचारः, वर्णग्रहणविचारः इत्यादयः

**Module 4 – तत उत्तराः पञ्च परिभाषाः** **15 sessions**

**Objectives –**

- परिभाषाणां विषयस्य निष्कर्षः
- विविधपक्षविमर्शनपुरःसरं ग्रन्थकर्तुः सिद्धान्तपक्षस्य ज्ञानम्

**Topics –**

- तदन्तग्रहणविचारः,

## 6. Pedagogy

अध्यापनपद्धतिः प्रायेण उपन्यासरूपा अभ्यासरूपा च भवति । अयं विषयः प्रक्रियाबहुलः इति कारणतः लेखनफलकस्य अधिकतया उपयोगः करिष्यते । ग्रन्थाध्ययनावसरे अपेक्षितानां भागानां व्याख्यानमपि बोधयिष्यते ।

## 7. Learning Outcome

एतं ग्रन्थभागमधीतवन्तः छात्राः सूत्रार्थेषु गभीरं चिन्तनं कर्तुं समर्थाः भवेयुः । तत्र सूत्रार्थेषु मतभेदाः, सूत्रन्यासादिभेदे फलभेदः इत्यादिकं शास्त्रीयं विचारं सुष्ठु निरूपयितुं शक्ताः भवेयुः ।

## 8. Evaluation Pattern

- कार्यसमर्पणम् २० अङ्काः
- प्रस्तुतिः १५ अङ्काः
- सत्रार्धपरीक्षा २५ अङ्काः
- सत्रान्तपरिक्षा ४० अङ्काः